International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 164-167
© 2022 IJSR
www.anantaajournal.com
Received: 15-11-2021
Accepted: 28-12-2021

**डॉ. मेधाकुमारी**
सहायक आचार्या
संस्कृतविभागः, सामसी
महाविद्यालयः, सामसी,
मालदा, पश्चिमवङ्गः, भारत

Corresponding Author:
**डॉ. मेधाकुमारी**
सहायक आचार्या
संस्कृतविभागः, सामसी
महाविद्यालयः, सामसी,
मालदा, पश्चिमवङ्गः, भारत

# भारतीयसमाजे नारीभावना

## डॉ. मेधाकुमारी

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i1c.2492

**प्रस्तावना**

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभवयतः शान्तिरशान्तस्य कुतः सुखम् ।। [1]

वैदिककालादारभ्य भारतीयसमाजे मानवसमाजः पुरुषप्रधानः प्रतीयते तथापि समाजे नारीसमाजं प्रति श्रद्धाभावना न ऊनायते । जगतः कल्याणाय राष्ट्रस्य निर्माणाय समृद्धये च ऋषीणां नारीभावना उत्तमा आसीत् ।

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्रफलाः क्रियाः" ।।[2]. इति
शोचन्ति जायामो यत्र विनश्यत्याशु तत्कुलम्।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा ।।[3]
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु ।। [4]

नार्यः शत्रुरहिताः याषां न सल्ति अरयः ताः नार्यः इति उच्यन्ति । अर्थात् नार्यः सर्वेषां सहृदयभूताः। ताः सर्वेषाम् आदरणीयाः इति वदन्ति, वैदिककातादारम्य आधुनिककालं यावति भारतीयाः नार्य पूजनीयाः, सम्मानीयाः भवन्ति ति दृश्यते। परन्तु आधुनिकसमाजे मर्यादाहीनाः नराः नारीः नर्त्तयन्ति अपमानयन्ति सुखसाधनभूताः च इति मन्यन्ति। वैदिकऋषीणां धार्मिकभावनासंपन्नानां हृदयेषु नारीमर्यादा यथाधिका तथ आधुनिकेषु केषुचित् नरेषु सा न दृश्यते इतु दुःखस्य विषयः।

वास्तवतः नार्यः यत्र पूज्यन्ते तत्र देवता- अर्थात् ज्ञानिनः वीरपुरुषाः राष्ट्रसुरक्षकाः महापुरुषाः विद्वांसः पण्डिताः महात्मनःत आविर्भूताः भवन्ति।

परन्तु यत्र नार्यःअपमानिताः पीडिताः च भवन्ति तत्र अशान्तिः राजते। अस्माकं देशे यथा नार्यः सम्मानाष्पजाः विभन्ति तथा अन्यत्र न दृश्यते, अत-देवा- स्वास्थानं विहाय भारतभूमौ अवसरितुम् इच्छन्ति। यथा उच्यते विष्णुपुराणे-

"गायन्ति देवाः किल गीतकानि,
धन्यास्तु ते भारत भूमिभागे।
सर्गोपवर्गा स्पद हेतु भूते,
भवन्ति भूयः पुरुषाः सुरत्वात्"।। इति।।

वैदिकयुगे नारीणां गौरवं महत्वं वैशिष्टयं च अवर्णनीयम्। नारी कल्याणमयी,गुणवती ब्रहमवादिनी,पतिव्रता सहधमिर्णी सुगृहिणी सहचारिणी च आसीत्। परिवारनिर्माणे तस्याः भूमिका आदर्शस्थानीया दृश्यते । वैदिककालीन नार्यः विभिन्नशास्त्रेषु युद्दविद्यां परिवार-चालनायां च विशारदा- आसन् । तासु महिलासु काश्चित् स्मर्यन्ते अत्र- यथा लोपामुद्रा, उवर्शी, विश्ववारा। आपाला, मदालसा, सावित्री घोषा, गार्गी, मैत्रेयीप्रभृतय- ब्रहमवादिन्यः सेवापरायणाः राष्ट्ररक्षकाः चेति ।
वैदिकयुगात् परं रामायण-महाभारतादौ अपि वहवः नार्यः समाजे गौरवभाजनाः अभवतन्. तासु सीता कैकेयी, कौशल्या, सुमित्रा, मन्ददोरी, गन्धारी, कुन्ती, द्रौपदीप्रभृतयः समाजकल्याणकारिण्यः पूज्याः वर्त्तन्ते। महाभीरते नारीपूजापरकं वचनं प्राप्यते यथा-

पूजनीय महाभागाः पुण्याश्च गृहदीप्तयः।
स्त्रियः श्रियो गृहस्योक्ताः।। इति ।।[5]

नारीषु प्रीति रति धर्मश्च दरीदृश्यते इति महाभरत गदति। यथा-

"सुसरंब्धोपि रामाणां न ब्रूयादप्रियं नरः।
रति प्रीतिं च धर्मं च तास्वायत्तमवेस्यहि"।। इति।।[6]

भार्यारूपेण तस्याः समधिक प्रशंसा परिलक्ष्यते । सा पत्युः अर्धाङ्गिनीरूपेण विद्यामा अस्ति।यथा उक्तम्—

अर्धभार्या मनुष्यस्य भार्याश्रेष्ठतमः सखा।
भार्यामूलं त्रिवर्गस्य भार्यामूलं तरिष्यतः।।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रिया युता ।।[7]
पुनः- धर्मकामार्थ कार्याणि शुश्रुता कुल सन्ततिः।
द्वारेष्वधीनो पितृणात्मनस्तथा ।।[8]

पुराणेषु भारतीयनारीसतीत्वमेव सर्वत्रैव विचार्यते इति लक्ष्यते। गृहस्थाश्रमे नारी सर्वसुखदात्रीति उच्यते। यथा-

गृहस्थाश्रमः सुखार्थाय पत्नीमूलं हि तत्सुखम् ।।[9]

कालिदाससाहित्ये नार्यः न केवलं सहभागिन्यः सति अपितु ताः शक्तेः प्रकटितस्वरूपाः भवन्ति। रघुवंशमहाकाव्यस्य प्रारम्भे पार्वतीपरमेश्वरयोः वन्दनतः ज्ञायते यत् स्त्रीणां समप्राधान्यत्वं वर्तते। यथा-

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।[10]

किरातार्जुनीये महाकाव्ये भारविः नारीणां यां स्थितिमुपस्थापयति सा अनन्या असाधारणीया । यथा-

भवादृशेषु प्रमदा जनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमयादुराधयः।।[11]

भवभूतिः उत्तररामचरिते प्रथमाङ्के सीतां प्रशंसन् अपि आह-

"इयं गेहे लक्ष्मीरियममृत वर्त्तिर्नयनयो
रस्यावस्याः स्पर्शे वपुषि बहुलश्चन्दन रसः।
अयं वाहुः कण्ठे शिशिरमसृणो मौक्तिक सरः।
किमस्या न प्रियो यजि परम सह्यस्तु विरहः" ।।
इति।।[12]

रसगङ्गाधरकारः पण्डितराजः अपि नारीप्रशंसा प्रसङ्गे उक्तवान् यथा-

"हरिणी प्रेक्षणा यत्र गृहिणी न विलोक्यते।
सेवितं सर्वसंपद्भिरपि तद्भवनं वनम्" ।। इति ।।[13].

नारीः श्रद्धा इति कालिदासः अभिज्ञानशाकुन्ते गदति, यथै-

"दृष्ट्या शाकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धाक्तिं विधिश्चेति त्रितयं तत् समागतम्' ' ।।[14]
पुनः स नारी अशिक्षित पटुत्वम् इति घोषयति। नारीसमाज- सदा पर निर्भरशील स्वतन्त्र्यरहितः इति विषये यः श्लोकः उच्यते-

"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
स्यविरे रक्षति पुत्राः न स्त्री स्वातन्त्र्यमर्हति" ।। इति
(महाभारत) विचार्यते।

पुरुषप्रधानसमाजे नारी दुर्बला, अवला परनिर्भरशीला पराधीनाश्चेति धारणा जनानां विद्यते। परन्तु नारीणां कृते यः "अवला" इति शब्दः प्रयुक्तः दृश्यते। तत्र सवला इति अर्थः विपरीत लक्षणया आयाति महृदयानां हृदयम्। नारी युगानुसारं परिवर्त्तनशीला भवति। वैदिकयुगे यस्य गृहे कन्या नासीत् सः गृहस्यः निन्दितः अभवत्। तदा कन्यारत्नम् इति मन्यते स्म। कन्यादानं महत् पुण्यम् इति विश्वासः आसीते। कृपणा हि दुहिता इति हरिश्चन्द्र उपाख्याने। दुहिता दूरेहिता निहिता स्थापिता इति यास्काचार्यमतम्। इति विचारणीयम् अस्माभिः। अस्माकं भारतीयानां मतेतु कन्या सर्वदा पूज्या समाजस्य रक्षिका। सा उभय कुलम् अर्थात् पितृकुलं पतिकुलं च पावयति । अस्मिन् विषये कालिदासः आह कुमारसंभवे-

"महीभृत पुत्रवतोपि दृष्टिस्तस्मिन्
अपत्ये न जगाम तृप्तिम्।
अनन्तपुष्पस्य मधुर हि चूते
द्विरेफमाला सविशेष सङ्गः।।" इति।। 15.(1/ 29)
पुनः- "प्रभामहत्या शिरवयेव दीप
स्त्रिमार्गचेव त्रिदिवस्य मार्गः।
संस्कारवत्येव गिरा मनीषी
तया स पूतश्च विभूषितश्च।।" 16

समाजे दुर्बलमनाः संकीर्णमनाः च जनाः कल्या सन्तान जातेन दुःखिताः चिन्तिताः च भवन्ति। कन्या जन्मदिवसतः आरभ्य अर्थसंचयं कुर्वन्ति विवाहार्थं न तु समुचित शिक्षार्थम्। कन्या परकिया कन्या वै प्रदेया इति मन्यन्ते। यदि केनाचित् कारणेन कन्या विवाहः विलम्वः भवति तर्हि सर्वे कन्या पितरौ पृच्छन्ति। परन्तु पुत्रस्य विवाह विषये न। प्रायेण जनाः कन्यानां दोषं दर्शयन्ति न तु पुत्राणाम्, एतादृशी नीचभावना संप्रति वैज्ञानिकयुगे न समीचीना। मध्ययुगे वेशेषतः कन्यानां स्थितिः सर्वेषु क्षेत्रेषु शोचनीया आसीत्। परन्तु आधुनिके युगे स्वन्त्रतायाः परं कन्याः स्वचेष्टया सर्वकारेण प्रोत्साहनेन सर्वेषु विभागेषु दक्षतासंपन्नाः सत्यः लब्धप्रतिष्ठाः प्रशंसाभाजनाः अग्रण्याः विभान्ति। तासु कन्यासु महिलासु वा एताः स्मर्यन्ते यथा- राजनीतौ इन्द्रिरागान्धी, सोनियागान्धी सुस्मास्वराज सरोजिनिनाइडु, वसुन्धरराराजे, स्मृति इरानीप्रभृतयः। प्रशासनविभादे किरणवेदी, रूमामिश्र नन्दिनी केआरादयः, क्राक्षेत्रे पिटि उषा, सानियामिर्जा प्रभृतयः। न्यायालये न्यायाधीशरूपेण प्रतिभाविवां संगीतक्षेत्रे लतामंङ्गेस्कर, विमानचालने सरला ठाकरेल गणितशास्त्रे शकुन्तलादेवी, वायुसेनाध्यक्षरूपेण पुनिता आरोरा महाकाशाचारिणी कल्पना चाउला प्रभृतयः न केवलं भारतवर्षे अपि तु समग्रे विश्वे अग्रस्थानानि अलंकुर्वन्ति।

संप्रति शिक्षाक्षेत्रे विद्यालये-महाविद्यालये-विश्वविद्यालये च कन्याः परीक्षायां प्रथमस्थानम् अर्जयन्ति। कन्याः शिक्षागत योग्यतानुसारं विभिन्नेषु कर्मक्षेत्रेषु नियुक्ताः सत्यः अर्थार्जनं कुर्वन्ति, स्वस्य परिवारं परिचालयन्ति, देशरक्षार्थं सीमान्तप्रदेशेषु सुरक्षिकारूपेण कार्यं निर्वाहयन्ति। देशात् वहिः गत्वा स्वदेशस्य महत्वं गौरवं च वर्दधयन्ति। स्वस्य सुरक्षार्थं जोड.वक्सिं प्रभृतीः समाराभ्यसं च कुर्वन्ति। तथापि समाजे कन्यां प्रति नीचभावना असामाजिकानां दृश्यते, प्रायतः पुत्रान् प्रति जनानां यथा स्नेहं दृश्यते तथा पुत्रीः प्रति स्यात्। अन्यथा ईश्वर कोपः द्रोही वा भवेत्। यतो हि ईश्वरः समदर्शी। समदर्शिणं च रक्षितुं कृतप्रतिज्ञः वर्त्ते तथा च –

कीर्त्तिः श्रीवाक् च नारीणां।
स्मृति मेधा धृतिः क्षमा।। इति।। गीतावचनम्।

एवमेव उक्त भवति यत्- कन्या रत्नत्वेन सुखसमृद्धत्वेन श्रद्धात्वेन पूजास्थानत्वेन च यावत् कालं पर्यन्तं मान्या न भवेत् तावत् कालपर्यन्तं परिवारस्य समाजस्य राष्ट्रस्य च समृद्धः शान्तिपूर्णस्थितिः च न भवेदिति निष्कर्षतया वक्तुं शक्यम्। इति। नमः नारीसमाजं।

## सन्दर्भसूची


1. श्रीमद्भगवद्गीता. 2-66 ।
2. मनु. - 3/56 ।
3. तत्रैव.57 ।
4. तत्रैव. 3.59 ।
5. महाभारत.युद्ध पर्व 33/11 ।
6. महा.आदि. पर्व 74/51 ।
7. महाभारत आदि. 74-41 ।
8. महा.अश्व. 90.47 ।
9. पद्मपुराण.उत्तरखण्ङ. 36-7 ।
10. रघु. 1.1 ।
11. किरात. 1.28 ।
12. उत्तररामचरित- 1-38।
13. रसगङ्गाधर-
14. अभिज्ञान. (7/29) ।
15. कुमारसंभव. 1/ 29 ।
16. तत्रैव. 1/ 28 ।
17. ऋग्वेदः, गीताप्रेस, गोरखपुर, सं 2052।
18. रामायणम्, गीताप्रेस्, गोरखपुर, सं 2057 ।
19. महाभारतम्, गीताप्रेस्, गोरखपुर, सं 2057।
20. निरुक्तम्, दुर्गाचार्य, आनन्दाश्रममुद्रणालय, पुने, 1931।
21. हरिश्चन्द्रोव्याख्यान्, सुषमापाण्डेय, मोतिलालवनारसीदास, वाराणसी, 1998।
22. कुमारसम्भवम्, गङ्गाधरशास्त्रीभरद्वाज, चौखम्बाविद्याभवन, वाराणसी, 1953।
23. अभिज्ञानशाकुन्तम्, कृष्णमणित्रिपाठी, चौखम्बासुरभारती, वाराणसी, 2022।
24. श्रीमद्भगवत्गीता, गीताप्रेस्, गोरखपुर, सं 2053।
25. उत्तरमामचरितम्, आनन्दस्वरूप, मोतिलालवनारसीदास, वाराणसी, 1974 ।
26. रसगङ्गाधरः, मदनमोहनझा, चौखम्बाविद्याभवन, वाराणसी, 1982 ।
27. दैनिकसंवादपत्राणणि ।